ष्मान्त्सस्रवंतीभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमि॥पुनःवारद्वयंपूर्ववद्वदेत्॥आयुषमितिच॥त्र्यायुषंजमदग्नेःकश्यपस्यत्र्या
युषं॥यद्देवेषुत्र्यायुषंतन्नोअस्तुत्र्यायुषं॥१॥सयदिकामयेतसर्वमायुरियादितिवात्सप्रेणैनमभिमृशेद्दिवस्परीत्येतस्यानुवाक
स्योत्तमामृचंपरिशिनष्टि॥दिवस्परिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः॥तृतीयमप्सुनृमणाअजस्रमिन्धानएनंजरते
स्वाधीः॥१॥० विवद्धः॥इत्यनुवाकः॥प्रतिदिशंपंचब्राह्मणानवस्थाप्यब्रूयात्॥इममनुप्राणितेति॥इममनुप्राण॥पूर्वो॥ब्रूया राम १३

त्प्राणेति॥प्राण॥व्यानेतिदक्षिणः॥व्यान॥अपानेत्यपरः॥अपान॥उदानेत्युत्तरः॥उदान॥समानेतिपंचमउपरिष्टादवेक्षमाणो
ब्रूयात्॥समान॥स्वयंवाकुर्यादनुपरिक्राममविद्यमानेषु॥प्राण॥व्यान॥अपान॥उदान॥समान॥सयस्मिन्देशेजातोभवतित
मभिमंत्रयतेवेदतेभूमिहृदयंदिविचंद्रमसिश्रितं॥वेदाहंतन्मांतद्विद्यात्पश्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदः
शतमिति॥अथैनमभिमृशति॥अश्माभवपरशुर्भवहिरण्यमस्रुतंभव॥आत्मावैपुत्रनामासिसजीवशरदःशतमिति॥अथास्य
मातरमभिमंत्रयते॥इडासिमैत्रावरुणीवीरेवीरमजीजनथाः॥सात्वंवीरवतीभवयास्मान्वीरवतोकरदिति॥अथास्यैदक्षिणं १५
स्तनंप्रयच्छतिइमंस्तनमिति॥इमंस्तनमूर्जस्वंतंधयापांप्रपीनमग्नेसरिरस्यमध्ये॥उत्संजुषस्वमधुमंतमर्
वंत्समुद्रियंसदनमाविशस्व॥१॥यस्तेस्तनःशशयोयोमयोभूर्योरत्नधावसुविद्यःसुदत्रः॥येनविश्वापुष्यसिवार्याणिसरस्वतितमिहधातवेकःउदपात्रंशिरस्तोनिदधाति॥आपोदेवेति॥द्वारदेशेसूतिकाग्निमुपसमाधाय॥दशैः॥गोमयादकेनोपलिप्य॥क्रियेता०
ष्या॥अनामिकां०त्या॥उदके०स्या॥अग्निमुपसमाधाय॥फलीःकरणमिश्रान्सर्षपानग्नावावपति॥शंडामर्काउपवीरःशौंडिके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यस्ति श्रोः बीजगर्भसमुद्भवएनोनिबर्हणायुर्मेधाभिवृद्धिव्यवहारसिद्धिद्वारा श्री॰ नामकर्माहं करिष्ये

गो॰श्रा
१४

घळलूखलः॥मलिमुचोद्रोणाश्च्यवनोनश्यतादितःस्वाहा॥इदमग्नयेनमम॥आलिखन्ननिमिषःकिंवदंतउपश्रुतिर्हर्यक्षःकुंभीश
त्रुपात्रपाणिर्नृमणिर्हंत्रीमुखःसर्षपारुणश्च्यवनोनश्यतादितःस्वाहा॥इदमग्नयेनमम॥पूर्वोच्चरित०थौकृतस्यजातकर्मणस्यकर्म
णःसांगतासिद्ध्यर्थंस्तुक्रान्दशसंख्याकान्ब्राह्मणान्यथोपपन्नेनान्नेनाहंभोजयिष्ये॥तेनश्रीकर्मांगदेवताप्रीयताम्॥ ॥इति
जातकर्मसमाप्तः॥ ॥पूर्वोच्चरितए०थौअस्यकुमारस्यनामकर्माख्यंकर्माहंकरिष्ये॥तदंगत्वेनगणपतिपूजनंस्वस्तिपुण्याहवाच
नंमातृकापूजनंवसोर्धारानांदीश्राद्धंचाहंकरिष्ये॥दशम्यामुत्थाप्यब्राह्मणानभोजयित्वा॥पूर्वोच्चरित०थौनामकर्मांगतयाविहितान्
त्रीनसंख्याकान्ब्राह्मणान्यथोपपन्नेनान्नेनाहंभोजयिष्ये॥कुंभोनंतःअच्युतश्चक्रीवैकुंठोथजनार्दनः॥उपेंद्रोयज्ञपुरुषोवा
सुदेवस्तथाहरिः॥योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात्॥१॥ ॥पितानामकरोति॥ ॥असौसंवत्सरोसौवा॥ ॥त्वंगणपतिभ
क्तोसि त्वंदुर्गाभक्तोसि॥मासनाम्नाअनंतशर्मासि॥नक्षत्रनाम्नामहादेवशर्मासि॥व्यवहारनाम्नाकाशिशर्मासि॥त्वंगणपतिभक्तः
सर्वान्ब्राह्मणानभिवादयते॥आयुष्मानभव॥गणपतिभक्तः॥त्वंदुर्गाभक्तःसर्वान्ब्राह्मणानभिवादयते॥आयुष्मानभव॥दु
र्गाभक्तः॥मासनाम्नाअनंतशर्मासर्वान्ब्राह्मणानभिवादयते॥आयुष्मान्भव॥महादेवशर्मान्॥व्यवहारनाम्नाकाशिशर्मासर्वा राम
१४

न्ब्राह्मणानभिवादयते॥आयुष्मानभव॥काशिशर्मान्॥पूर्वोच्चरितए०थौकृतस्यनामकर्माख्यकर्मणःसांगतासिद्ध्यर्थंस्तुक्रान
दशसंख्याकान्ब्राह्मणान्यथोपपन्नेनान्नेनाहंभोजयिष्ये॥तेनश्रीकर्मांगदेवताप्रीयताम्॥ ॥इतिनामकर्मसमाप्तः॥पूर्वोच्चरितए
०थौअस्यकुमारस्यनिष्क्रमणाख्यंकर्माहंकरिष्ये॥तदंगत्वेनगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंवसोर्धारानांदी
श्राद्धंचाहंकरिष्ये॥चतुर्थेमासिनिष्क्रमणिकामसूर्यमुदीक्षयति॥तच्चक्षुरिति॥सूर्यमुदीक्षस्व॥तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्॥पश्येम
शरदःशतंजीवेमशरदःशतं शृणुयामशरदःशतंप्रब्रवामशरदःशतमदीनाःस्यामशरदःशतंभूयश्चशरदःशतात्॥एपूर्वोच्चरितए०थौ
कृतस्यनिष्क्रमणाख्यस्यकर्मणःसांगतासिद्ध्यर्थंस्तुक्रान्दशसंख्याकान्ब्राह्मणान्यथोपपन्नेनान्नेनाहंभोजयिष्ये॥तेनश्रीकर्मांग
०॥ ॥इतिनिष्क्रमणसमाप्तः॥ ॥ए॥पूर्वोच्चरितए०थौअस्यकुमारस्यपुंमवउपवेशनाख्यंकर्माहंकरिष्ये॥तदंगत्वेनगणपतिपूजनंस्व
स्तिपुण्याहवाचनंमातृकापूजनंवसोर्धारानांदीश्राद्धंचाहंकरिष्ये॥तदंगत्वेनपृथिवीपूजनमहंकरिष्ये॥महीद्यौःपृथिवीचनइमंयज्ञ
मिमिक्षताम्॥पिपृतान्नोभरीमभिः॥तदंगत्वेनअनंतपूजनमहंकरिष्ये॥तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः॥दिवीवचक्षुराततं॥श
॥तदंगत्वेनकूर्मपूजनमहंकरिष्ये॥विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि॥वैष्णवमसिविष्णवेत्वा॥३॥इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोडशा०
१५

नंवसुवेदेवीसदासर्वेगतंशुभे॥आयुःप्रमाणमखिलंनिक्षिपस्वहरिप्रिये॥१॥अचिरादापुरासस्यएकेचिरस्रिंपथिनः॥जीविताये
स्यवित्तस्य निदेहहस्वचिरेसतो॥२॥धातृरूपेशेशभूतानांमातस्त्वमधिकाह्यसि॥कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां॥३॥पूर्वोच्चरि
तएवं०योकृतस्यउपवेशनाख्यस्यकर्मणः सांगतासिध्यर्थंसंतुक्तान्दशसंख्याकान्ब्राह्मणानयथोपपन्नेनान्नेनतमहंभोजइष्ये॥ ॥
इतिउपवेशनसमाप्तः॥ ॥पूर्वोच्चरितएवं०योअस्यकुमारस्यअन्नप्राशनाख्यंकर्माहंकरिष्ये॥तदंगत्वेनगणपतिपूजनंस्वस्तिपुण्या
हवाचनंमातृपूजनंवसोर्धारानांदीश्राद्धंचाहंकरिष्ये॥षष्ठेमासेअन्नप्राशने०स्थालीपाकं०अपद्त्वा॥दर्भैःपरिसमूह्य॥गोमयोपलि०उदक
०प्य॥कृवे०ख्य॥अनामि०त्य॥उदकेनाभ्युक्ष्य॥अग्निमुपसमाधाय॥दक्षिणतोब्रह्मा०ये॥अग्निंकर्मेशि०वा॥भवामि॥उत्तरे०
प॥अग्निमुप०य॥आलभेत॥ब्रह्मानु०ति॥त्तरेणा०यं॥अथ०घ्य॥पवित्रछे०य॥पवित्रेद्वे॥प्रोक्ष०त्रं॥आज्यस्थाली॥चरुस्थाली॥संम्मा
र्गकुशाः॥उपय०शाः॥समिधः०स्त्वः॥स्रुवः॥आज्यंतंडुलाः॥पूर्णपात्रं०ति॥पवित्रेकृत्वा॥द्वयोरुपरि०पा॥द्वौमूलेनद्वौकु०त्य॥सर्वाण्यु
पदस्थत्वाछेदगेह॥प्रोक्षणीः संस्कृत्य॥प्रोक्षणीपा०त्वा॥ताभ्यामुत्पवनं॥तास्थाने०पोः॥सर्वेकृत्वा॥दक्षि०मं॥ताभिःता०णां॥पूर्ववं
आसनं॥प्रजापतयेस्वाहा॥इदंप्रजापतयेनमम॥इंद्रायस्वाहा॥इदमिंद्राय०म॥अग्नयेस्वाहा॥इदमग्नये०म॥सोमायस्वाहा॥इदंसोमा राम
१५

यनमम॥आज्यस्थालीभागाविधाज्याहुतीर्जुहोति॥देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंती॥सानोमन्द्रेषमूर्जंदुहानाधे
नुर्वागस्मानुपसुष्टुतेतुस्वाहा॥इदंवाचेनमम॥वाजोनोअद्येतिचद्वितीयं॥देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंती॥सा
नोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतेतुस्वाहा॥वाजोनोअद्यप्रसुवातिदानंवाजोदेवाऋतुभिःकल्पयाति॥वाजोहिमासर्व
वीरंजजानविश्वाआशावाजपतिर्जयेयंस्वाहा॥इदंवाचेवाजायनमम॥चरुमभिघार्य॥स्थालीपाकस्यजुहोति॥प्राणेनान्नमशीयस्वा पै४
हा॥इदंप्राणायनमम॥अपानेनगंधानशीयस्वाहा॥इदमपानायनमम॥चक्षुषारूपाण्यशीयस्वाहा॥इदंचक्षुषेनमम॥श्रोत्रेणयशोय
शीस्वाहा॥इदंश्रोत्रायनमम॥अग्नयेस्विष्टकृतेस्वाहा॥इदमग्नयेस्विष्टकृतेनमम॥भूः०हा॥इदमग्नयेनमम॥भुवःस्वाहा॥इदंवा
य०म॥स्वः स्वाहा॥इदंसूर्यायनमम॥त्वंनोअग्ने०हा॥इदमग्नीवरु०म॥सत्वंनोअग्ने०हा॥इदमग्नि०मम॥अयाश्चाग्नेस्य०अ०हा॥इदम
पै ग्नि०मम॥येतेशतंवरुणा०हा॥इदंवरुणायसवि०म॥उदुत्तमंवरुणपा०हा॥इदंवरुणायादि०म॥प्रजा०हा॥इदंप्रजा०म॥संस्रवप्राशनं
॥पवित्राभ्यां०नं॥पवित्रःप्रतिः॥ब्रह्मणेपू०नं॥कृतस्यअन्नप्राशनाख्यस्य०ब्रह्मन्इदंपूर्णपात्रंदानं॥तुभ्यमहंसंप्रददे॥प्रतिगृहीतावि
मोकः॥प्राशनांतेसर्वान्रसान्सर्वमेत्रमेकत्रीकृत्य॥अथैनंप्राशयेत्तूष्णीं०हंतेतिवाहंतकारंमनुष्याइतिश्रुतेः॥हंता॥पूर्वो०अन्न
प्राशनाख्यस्यकर्मणः सांगतासिध्यर्थंसंतुक्तान्दशसंख्याकान्ब्राह्मणानयथोपपन्नेनान्नेनतमहंभोजइष्ये॥तेनश्रीकर्मांगदेवताप्रियंतां॥

फ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोड्शा०
१६

॥ ॥इति अन्नप्राशनं समाप्तम् ॥ ॥पूर्वोच्चरित ए० वोऽस्य कु-डाकर्माख्यं कर्माहं करिष्ये॥ तदंगत्वेन गणपतिपूजनं स्वस्ति पुण्याहवाच
नं मातृकापूजनं वसोर्द्धारां नांदीश्राद्धं चाहं करिष्ये॥ सांवत्सरिकस्य चूडाकरणं॥ तृतीये वा प्रतिहते॥ षोडशवर्षस्य केशांतो यथा मंगलं वा
सर्वेषां ब्राह्मणान् भोजयि०त्वा॥ पूर्वोच्चरित ए० अस्य कुमारस्य चूडाकर्मांगतया विहितान् त्रीन्स्त्र्याकादब्राह्मणान् यथोपपन्नेनान्ने
नाहं भोजयिष्ये॥ माता कुमारमादाय॥ आज्ञाव्या॥ अहतेवाससी परिधाप्य॥ अंके आधाय॥ दर्भैः परिसमूह्य गोमयोदकेनोपलिप्य॥
स्रुवेणो०ष्य॥ अनामिकयो नो धृत्य०॥ उदकेनाभ्युक्ष्य॥ अग्निमुपसमाधाय॥ पश्चाद्दर्भेरुपविशता॥ दक्षिणतो ब्रह्मासनमास्तीर्य
॥ अग्निं कम्म० वा॥ भवामि॥ उत्तरत प्र०प॥ अग्निमुत्तरे० य॥ आलभते॥ ब्रह्मानुज्ञा० ति॥ तेषोमग्निप्र०वे॥ अथ ध्रुव० घ॥ पवित्रे छे०
य॥ पवि० दे॥ प्रोक्षणी० त्रं॥ आज्य० ली॥ सम्मार्गकुशाः॥ उपयमनकुशाः॥ समिधः स्तः॥ स्रुवः॥ आज्यं॥ पूर्णपात्रं॥ शीतोदकं॥ उष्णो
दकं॥ नवनीतपिंडं॥ त्रेण्याशलल्या॥ सप्तविंशतिदर्भाः॥ ताम्रमयी क्षुरः॥ गोमयपिंडं॥ पवित्रे कृत्वा॥ द्वयोरुपरि त्रिणि निदधाति
य॥ द्विमूलेनैवे० न्या॥ सर्वाण्यु० ते॥ प्रोक्षणीः सं० त्य॥ प्रोक्षणीपात्रे० त्वा॥ ताभ्या० नं॥ तास्थाने० यो॥ सव्ये कृत्वा॥ दक्षिणो० ने॥ नाभि
स्ता० गा॥ पूर्ववत्प्रोक्षणी॥ अन्वारब्धे आज्याहुती हुत्वा॥ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ इंद्राय स्वाहा॥ इदमिंद्राय० म॥ अग्नय
स्वाहा॥ इदमग्नये न मम॥ सोमाय० हा॥ इदं सोमाय न मम॥ भूः स्वाहा॥ इदमग्न० म॥ भुवः स्वाहा०॥ इदं वायवे न मम॥ स्वः स्वाहा॥ इदं सू

राम

र्याय न मम॥ त्वं नो अग्ने० हा॥ इदमग्नी० मा॥ सत्वं नो अग्नेव० हा॥ इदमग्नीवरुणाभ्यां० मा॥ अयाश्चाग्नेस्यन० हा॥ इदमग्नयेऽय० मा॥ ये ते
शतं वरुणा० हा॥ इदं वरुणाय सवित्रे० मा॥ उदुत्तमं वरु० हा॥ इदं वरुणायादि० म॥ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ अ
ग्नये स्विष्टकृते स्वाहा॥ इदमग्न० मा॥ संस्र० णं॥ पवित्राभ्यां० नं॥ पवित्रः प्रतिपत्तिः॥ ब्रह्मणे पूर्ण० म॥ कृतस्य चूडाकर्माख्यस
कर्मणः सांगतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं संप्रददे॥ प्रणीताविमोकः॥ प्राशनोत्तरे शीतास्वप्सु उष्णा अभिसिंचति॥ उ
ष्णेन वाय उदकेनेह्यदितेकेशान् वप॥ अथात्र नवनीतपिंडं॥ दधिपिंडं द्रप्सो वा प्राप्स्यति॥ ततः आरात्पदक्षिणं गोदानमुंदति॥ स
वित्रा प्रसूता दैव्या आप उंदंतु ते तनूं दीर्घायुत्वाय वर्चसे॥ त्रेण्याशलल्या विनीय॥ त्रीणि कुशतरुणान्यंतर्दधाति॥ ओषधे त्राय
ति॥ ओषधे त्रायस्वैनं [struck through] स्वधिते मैनं हिं० सीः॥ शिवो नामेति लोहक्षुरमादाय॥ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा
हिं० सीः॥ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥ येनावपत्सवि
ता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्॥ तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथा सम॥ सकेशान् प्रच्छिद्य॥ आन
डुहे गोमयपिंडे प्रास्यति॥ उत्तरतो प्रियमाणे॥ एवं द्वितीयं तृतीयं॥ उंदनं॥ त्रेण्याशलल्या विनयनं॥ त्रयाणां कुशानामंतर्द
धानं॥ क्षुरनिधानं छेदनं॥ आनडुहे गोमयपिंडे प्रास्यति॥ पुनः वारमेकं तूष्णीं पूर्ववत्॥ ततः आरात्पश्चिमं गोदानमुंदति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रिजेनामाप्ति

षोड०सं० ११

सवित्राः प्रसूता दैव्या आपउंदंतु ते तनूं ॥ दीर्घायुत्वाय वर्चसे ॥ त्रेण्या शलल्या विनिय ॥ त्रीणि कुशतरुणान्यंतर्दधाति ॥ ओषधय
रति ॥ ओषधे त्रायस्वैनं स्वधिते मैनं हिंसीः ॥ निवर्त्तयामीति प्रवपति ॥ निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजा
स्त्वाय सुवीर्याय ॥ अथ पश्चात् आयुषमिति ॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं ॥ यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषं ॥ सकेशानि
प्रछिद्य ॥ आनडुहे गोमयपिंडे प्रास्यति ॥ उत्तरतो ध्रियमाणे ॥ पुनः वारद्वयं तूष्णीं पूर्ववत् ॥ ततस्मादायउदग्गोदानमुंदति
॥ सवित्राः प्रसूता व चेसे ॥ त्रेण्या शलल्या विनीय ॥ त्रीणि कुशतरुणान्यंतर्दधान्योषधयस्त्रायस्व स्वधिते मैनं
हिंसीः ॥ निवर्त्तयामीति प्रवपति ॥ निवर्त्तयाम्या० सुवीर्याय ॥ अथोत्तरतः ॥ येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यं ॥ तेन ते आ
पामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये ॥ सकेशानि प्रछिद्य ॥ आनडुहे गोमयपिंडे प्रास्यति ॥ उत्तरतो ध्रियमाणे
॥ पुनः वारद्वयं तूष्णीं पूर्ववत् ॥ त्रिः क्षुरेण शिरः प्रदक्षिणीकृत्य ॥ यत्क्षुरेण मज्जयता सुपेशसा वप्ता वा वपति ॥ केशाञ्छिंधि
शिरो मास्यायुः प्रमोषीः ॥ ताम्रिः रश्मिः शिरस्समुप्य ॥ नापिताय क्षुरं प्रयच्छति ॥ अप्रसारं परिवप ॥ यथामंगलं केशशेषकरणम् ॥ अ
नुगुप्तमेतं सकेशं गोमयपिंडं निधाय ॥ गोष्ठे पल्वल उदके वा ॥ आचार्याय वरं ददाति ॥ कृतस्य चूडाकर्माख्यस्य कर्मणः सांग
तासिध्यर्थं त्युक्तान्दशसंख्याकान्ब्राह्मणान्यथोपपन्नेनान्नेन अहं भोजयिष्ये ॥ तेन श्रीकर्मांगदेवता प्रीयतां ॥ ॥ इति चू

राम ११

एकादशवर्षे द्विराजन्यस्य द्वादशवर्षे वैश्यस्य ॥ २

डाकर्मसमाप्तः ॥ ॥ पूर्वोच्चरितए० योऽस्य शिशोः उपनयनाख्यं कर्म अहं करिष्ये ॥ तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं अवि
घ्नपूजनं मंडपप्रतिष्ठा मातृकापूजनं च वसोर्धारानांदीश्राद्धं चाहं करिष्ये ॥ अष्टवर्षं ब्राह्मणमुपनयेत ॥ गर्भाष्टमे वा ॥ यथामंगलं वा स
र्वेषां ब्राह्मणानां भोजयेत्तं च ॥ पूर्वोच्चरितए० थोउपनयनांगत्वया विहितान् त्रीन्संख्याकान्ब्राह्मणान् अहं भोजयिष्ये ॥ पर्युप्तशिरसमलं
कृतमानयंति ॥ दर्भैः परिसमूह्य ॥ गोमयोदकेनोपलिप्य० ॥ स्रुवेणो० ष्य ॥ अनामिकां० त्य ॥ उदकेना० स्य ॥ अग्निमुपसमाधाय ॥ प
श्चादग्नेरवस्थाप्य ॥ ब्रह्मचर्यमागामिति वाचयति ॥ ब्रह्मचर्यमागामिति ब्रूहि ॥ ब्रह्मचर्यमागां ॥ ब्रह्मचार्यसानीति ब्रूहि ॥ ब्रह्मचार्यस्मि
सानि ॥ अथैनं वासः परिधापयति ॥ येनेंद्राय बृहस्पतिर्वासः ॥ पर्यदधादमृतं ॥ तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ॥
सूत्रमेखलां बध्नीते ॥ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् ॥ प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेख
लेयं ॥ अत्र यज्ञोपवीतपरिधानं ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बल
मस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ अथाजिनं प्रयच्छति ॥ मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि
स्थविरं समिद्धं ॥ अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेहं ॥ दंडं प्रयच्छति तं प्रतिगृह्णाति ॥ यो मे दंडः परापतद्वैहायसो धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा०गृ०
१८

भूम्यां॥तमहं पुनराददाम्यायुषे ब्रह्मणो ब्रह्मवर्चसाय॥अथास्याञ्जलिनाञ्जलिं पूरयति॥आपो हि ष्ठेति तिसृभिः॥आपो हि ष्ठा
मयोभुवः स्तान ऊर्जे दधातन॥महे रणाय चक्षसे॥१॥यो वः शिवतमो रसः तस्य भाजयतेह नः॥उशतीरिव मातरः॥२॥तस्मा अरं गमा
म वो यस्य क्षयाय जिन्वथ॥आपो जनयथा च नः॥३॥अथैनं सूर्यमुदीक्षयति॥तच्चक्षुरिति॥सूर्यमुदीक्षस्व॥तच्चक्षुर्देवहितं
पुरस्ताच्छुक्रमुच्चरत्॥पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च
शरदः शतात्॥अथास्य दक्षिणांसमधि हृदयमालभते॥मम व्रते ते हृदयं दधामि॥मम चित्तमनु चित्तं ते अस्तु॥मम वाचमेकमना
जुषस्व॥बृहस्पतिष्ट्वा नियुनक्तु मह्यम्॥अथास्य दक्षिणं हस्तं गृहीत्वाह को नामासि॥रामशर्माऽहं भो॥कस्य ब्रह्मचार्यसि॥प्राण
॥इन्द्रस्य ब्रह्मचार्यसि॥पुनः कस्य ब्रह्मचारी॥अग्निः ब्रह्मचारी॥त्वाहमाचार्यो॥तुभ्यं च ब्रह्मचारिन्॥तव रामशर्मन्॥अथैनं भूतेभ्यः
परिददाति॥प्रजापतये त्वा परिददामि॥देवाय त्वा सवित्रे परिददामि॥अद्भ्यस्त्वौषधीभ्यः परिददामि॥द्यावापृथिवीभ्यां परिददामि॥
विश्वेभ्यस्त्वा देवेभ्यः परिददामि॥सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै॥प्रदक्षिणमग्निं परीत्योपविशति॥दक्षिणतो ब्रह्मासमास्ती
र्य॥अस्मिन्कर्मणि त्वं ब्रह्मा भव॥भवामि॥पूर्ववत्सर्वमादनीकं कृत्वा॥अन्वारब्ध आज्याहुतीर्हुत्वा॥प्रजापतये स्वाहा॥इदं प्रजा

॥र्यस्याग्निराचार्यस्तवाहमाचार्यस्तवाहमसावीति॥४॥

॥कर्म कुरु॥ करवाणि॥ मा दिवा सुषुप्थाः॥
नस्य पामि॥ वाचं यच्छ॥ यच्छामि॥ समिधमाधेहि॥ आदधानि

पतये न मम॥इन्द्राय स्वाहा॥इदमिन्द्राय न मम॥अग्न० हा॥इदमग्न० म॥सोमाय स्वाहा॥इदं सोमाय न मम॥भूः स्वाहा॥इदमग्नये न मम
॥भुवः० हा॥इदं वायवे न मम॥स्वः० हा॥इदं सू० म॥त्वं नो अग्ने० हा॥इदमग्निवरु० म॥स त्वं नो अग्ने अव० हा॥इदमग्निवरु० म॥अ
याश्चाग्नेस्य० हा॥इदमग्नये अ० म॥ये ते शतं वरुण० हा॥इदं वरुणाय सवि० म॥उदुत्तमं वरु० हा॥इदं वरुणायादित्याय न मम॥प्रजापतये
स्वाहा॥इदं प्रजापतये न मम॥अग्नये स्विष्टकृते स्वाहा॥इदमग्नये स्विष्टकृते न मम॥संस्रवप्राशनं॥पवित्राभ्यां मार्जनं॥पवि
त्राभ्यां मार्जनं॥पवित्रप्रतिपत्तिः॥ब्रह्मणे पूर्ण०त्रं॥कृतस्य उपनयनाख्यस्य कर्मणः सांगतासिद्ध्यर्थं ब्रह्मन्निदं पूर्णपात्रं स
न्तुभ्यमहं संप्रददे॥प्रतिगृह्णामि॥विमोकः॥प्राशनान्ते अथैनं संशास्ति॥ब्रह्मचार्यसि॥असानि॥अपोऽशान॥अश्नानि॥अथास्मै
सावित्रीमन्वाह॥उत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय॥दक्षिणतः तिष्ठत आसीनाय वैके
के पच्छोऽर्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्संवत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा॥सद्यस्त्वेव गायत्रीं ब्राह्मणाया
नुब्रूयात्॥आग्नेयो वै ब्राह्मण इति श्रुतेः॥त्रिष्टुभं राजन्यस्य॥जगतीं वैश्यस्य॥सर्वेषां वा गायत्रीम्॥अत ऊर्ध्वं समिदाधानं॥पाणिनाग्निं परि
समूहति॥अग्ने सुश्रवः सुश्रवसं मा कुरु॥यथा त्वमग्ने सुश्रवः सुश्रवा असि॥एवं मां सुश्रवः सौश्रवसं कुरु॥यथा त्वमग्ने देवानां यज्ञस्य
अ

द्वादशाहे ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोडशा०
१८

।निधिपा असि॥ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं॥ प्रदक्षिणमग्निं पर्युक्ष्य॥ उत्तिष्ठं समिधमादधाति॥ अग्नये समिधमाहा
र्षं बृहते जातवेदसे॥ यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो म
माचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा॥ एवं द्वितीयां तृतीयां॥ अग्नये समिधं० हा
॥१॥ अग्नये समिधमा० २॥३॥ पूर्ववत्परिसमूह पर्युक्षणं॥ अग्ने सुश्रवः सुश्रवसं मा०॥ यथा त्वमग्ने सु० सि॥ एवं मां सु० स
यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि॥ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं॥ पाणी प्रतप्य मुखं विमृष्टे॥ तनूपा अग्नेसि त
न्वं मे पाहि॥ आयुर्दा अग्नेस्यायुर्मे देहि॥ वर्चोदा अग्नेसि वर्चो मे देहि॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण॥ मेधां मे देवः सविता आ
दधातु॥ मेधां मे देवी सरस्वती आदधातु॥ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ॥ अंगान्यालभ्य जपति॥ अंगानि च म आप्या
यन्तां॥ प्राणाश्च म आप्यायन्तां॥ चक्षुश्च म आप्यायन्तां॥ श्रोत्रं च म आप्यायन्तां॥ यशो बलं च म आप्यायन्तां॥ आयुष्यं करोति॥
भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च॥ आयुष्यमिति प्रतिमंत्रं॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं॥ यद्देवेषु त्र्यायुषं
तन्नो अस्तु त्र्यायुषं॥२॥ शतायुषं बलायुषं॥ काश्यपगोत्रः कश्यपावत्सारनैध्रुवेति त्रिःप्रवर रामशर्माहं अहं भो अग्नेऽभिवाद

राम
१८

यामि॥ सूर्य अभिवादयामि॥ आचार्य अभिवादयामि॥ अत्र भिक्षाचर्यपरिचरणं॥ भवत्पूर्वां ब्राह्मणो भिक्षेत॥ भवन्मध्यां राजन्यः॥ भव
दन्त्यां वैश्यः॥ तिस्रोऽप्रत्याख्यायिन्यः॥ षड्द्वादशावापरिमिताः॥ मातरं प्रथमामेके॥ आचार्याय भैक्षं निवेदयित्वा॥ वाग्यतोहः शेषं तिष्ठेदि
त्येके॥ अहिंसन्नरण्यात्समिध आहृत्य॥ तस्मिन्नग्नौ पूर्ववद्धाय॥ वाचं विसृजते॥ अधःशय्यालवणाशी स्यात्॥ दंडधारणं॥ अग्नि
परिचरणं॥ गुरुशुश्रूषा भिक्षाचर्या॥ मधुमांसमज्जनोपर्यासनो॥ स्त्रिगमनं॥ अनृतादत्तादानानि वर्जयेत्॥ अष्टाचत्वारिंशद्वर्षा
णि ब्रह्मचर्यं चरेत्॥ द्वादश द्वादश वा प्रतिवेदं॥ यावद्ग्रहणं वा॥ वासांसि शाणक्षौमाविकानि॥ ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य॥ रौ
रवं राजन्यस्य॥ आजं गव्यं वा वैश्यस्य॥ सर्वेषां वा गव्यं॥ पूर्वोच्चरितएवं० गो० कृतस्य उपनयनाख्यस्य कर्मणः सांगतासिद्ध्यर्थं आचार्या
य गोः निष्क्रयभूतां दक्षिणां अहं ददामि॥ तेन श्रीकर्मांगदेवता प्रीयतां॥ अशक्त्या शतं ब्राह्मणान् भोजयेत्॥ ॥इति उपनयनं समाप्तं॥ ॥
पूर्वोच्चरितएवं० गो० अस्य वटोः वेदारंभाख्यं कर्माहं करिष्ये॥ तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धा
रां नांदीश्राद्धं चाहं करिष्ये॥ तदंगत्वेन गणपतिपूजनं अग्निस्थापनमहं करिष्ये॥ दर्भैः परिसमूह्य॥ गोमये० प्य॥ स्रुवेणो० ख्य॥ अना
मि० त्य॥ उदकेनाभ्युक्ष्य॥ अग्निं० य॥ पूर्ववत् आसादनीकर्तव्यानि॥ अन्वा० ब्रह्माज्यहतीहुत्वा॥ प्रजापतये स्वाहा॥ इदं प्रजापतये न मम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डग्रा० १०

इंद्राय०हा॥इदमिंद्रा०म॥अग्न०हा॥इदमग्न०म॥सोमायस्वाहा॥इदंसो०म॥अंतरिक्षयवायुवरुतियजुर्वेदे॥अंतरिक्षायस्वाहा॥इद
मंतरिक्षायनमम॥वायवेस्वाहा॥इदंवायवेनमम॥ब्रह्मणेऋग्वेदेभ्यश्चेति सर्वत्र॥ब्रह्मणेस्वाहा॥इदंब्रह्मणेनमम॥छंदोभ्यः०
हा॥इदंछंदोभ्योनमम॥प्रजापतदेवेभ्यःऋषिभ्यःश्रद्धायैमेधायैसदसस्पतयेनुमतयइतिच॥प्रजापतयेस्वाहा॥इदंप्रजापतयेन
मम॥देवेभ्यःस्वाहा॥इदंदेवेभ्योनमम॥ऋषिभ्यःस्वाहा॥इदंऋषिभ्योनमम॥श्रद्धायैस्वाहा॥इदंश्रद्धायैनमम॥मेधायैस्वाहा॥इ
दंमेधायैनमम॥सदसस्पतयेस्वाहा॥इदंसदसस्पतयेनमम॥अनुमतयेस्वाहा॥इदंअनुमतयेनमम॥भूः०स्वाहा॥इदमग्नयेनमम
॥भुवःस्वाहा॥इदंवायवेनमम॥स्वःस्वाहा॥इदंसूर्यायनमम॥त्वन्नोअग्नेवरु०हा॥इदमग्नीवरु०म॥सत्वन्नोअग्नेवमो०हा॥इदमग्नी
वरु०म॥अयाश्चाग्नेस्यनभि०हा॥इदमग्नयेअ०म॥येतेशतंवरुणहहा॥इदंवरुणायसवित्रेविष्ण०म॥उदुत्तमंवरुणपाशा०हा॥इदंव
यौ रुणादि०म॥प्रजापतयेस्वाहा॥इदंप्रजापतयेनमम॥अग्न०हा॥इदमग्नयेस्विष्टकृतेनमम॥संस्रवप्राशनं॥पवित्रा०नं॥पवित्रैः
प्रतिपत्तिः॥ब्रह्मणेपूर्णा०न॥कृतस्यवेदारंभाख्यस्यकर्मणःसांगतासिद्ध्यर्थंइदंब्रह्मन्पूर्णपात्रदानेनतुभ्यमहंसंप्रददे॥प्रणितावि
मोकः॥ॐभूर्भुवःस्वःतत्सवितु०प्रचोदयात्॥ ॥ॐइषेत्वोर्जेत्वा०पशून्पाहि॥१॥ग्नीसोःपवित्रं॥कृतस्यवेदारंभाख्यस्यकर्मणःसांगता राम १०

सिद्ध्यर्थं॥आचार्यायमनसोद्दिष्टांदक्षिणांअहंददाये॥छ॥इतिवेदारंभःसमाप्तः॥ ॥पूर्वोक्तरीत्या ए०यौ अस्यवटोःसमावर्तनाख्यंकर्म
हंकरिष्ये॥तदंगत्वेनगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंवसोर्धारानांदीश्राद्धंचाहंकरिष्ये॥तदंग॥भोआचार्यअहं
स्नास्ये॥स्नाहि॥दर्भैःपरिसमूह्य॥गोमयो०प्य॥स्रुवे०स्य॥अनामि०स्य॥उदके०स॥अग्नी०य॥दक्षिणतोब्रह्मासनमासनमा
सीय॥आसादनीपूर्ववत्कर्तव्या॥अन्वाधेयआज्याहुतीर्हुत्वा॥प्रजापतयेस्वाहा॥इदंप्रजा०म॥इंद्राय०हा॥इदमिंद्राय०म॥अ
ग्न०हा॥इदमग्न०म॥सोमा०हा॥इदंसोमा०म॥अंतरिक्षयवस्तियजुर्वेदे॥अंतरिक्षाय०हा॥इदमंतरिक्षाय०म॥वायवे०हा॥इ
दंवायवेनमम॥ब्रह्मणेस्वाहा॥इदंब्रह्मणेनमम॥छंदोभ्यःस्वाहा॥इदंछंदोभ्यो०म॥प्रजापतयेस्वाहा॥इदंप्रजापतयेनमम॥
देवेभ्यःस्वाहा॥इदंदेवेभ्योनमम॥ऋषिभ्यःस्वाहा॥इदंऋषिभ्योनमम॥श्रद्धायैस्वाहा॥इदंश्रद्धायैनमम॥मेधायैस्वाहा॥इदंमे
धायैनमम॥सदसस्पतयेस्वाहा॥इदंसदसस्पतयेनमम॥अनुमतयेस्वाहा॥इदंअनुमतयेनमम॥भूः०हा॥इदमग्नयेनमम॥भुवः०
स्वाहा॥इदंवायवेनमम॥स्वःस्वाहा॥इदंसूर्यायनमम॥त्वन्नोअग्नेवरुणा०हा॥इदमग्नीवरुणाभ्यां॥सत्वंनोअग्नेवमोम०हा॥इदमग्नि०
म॥अयाश्चाग्नेस्यत०हा॥इदमग्नयेअयस०म॥येतेशतंवरु०हा॥इदंवरुणायसवित्रे०म॥उदुत्तमंवरुणपा०हा॥इदंवरुणायादि०म॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बो॰श्रा॰
११

प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते न मम॥ संस्रवप्राशनं॥ पवित्राभ्यां मार्जनं
॥ पवित्रप्रतिपत्तिः॥ ब्रह्मणे पूर्णपात्रदानं॥ कृतस्य समावर्त्तनाख्यस्य कर्मणः सांगतासिध्यर्थं ब्रह्मन् इदं पूर्णपात्रं दानं तुभ्यमहं संप्र
ददे॥ प्रणीताविमोकः॥ उपसंगृह्य गुरुः समिधोऽभ्याधाय॥ अग्ने सुश्रवः सुश्रवसं मा कुरु॥ यथा त्वमग्ने सुश्रवः सुश्रवा असि॥ एवं
मां सु॰ कु॥ यथा त्वमग्ने देवानां॰ मि॥ एवमहं मनु॰ म्॥ प्रदक्षिणमग्निं पर्युक्ष्य॥ उत्तिष्ठन् समिधमादधामि॥ अग्नये समिधमहार्षं बृहते जा
तवेदसे॥ यथा त्वमग्ने॰ म॰ स्वाहा॥ एवं द्वितीयां तथा तृतीयां॥ पूर्ववत् परिसमूहनं॥ पर्युक्षणं॥ अग्ने सुश्रवः सुश्रवसं मा कुरु॥ यथा त्व
मग्ने॰ सुश्रवः॰ सि॥ एवं मां सु॰ कु॥ यथा त्वमग्ने देवानां॰ मि॥ एवमहं मनु॰ म्॥ पाणी प्रतप्य मुखं विमृष्टे॥ तनूपा अग्नेसि तन्वं मे पाहि॥
आयुर्दा अग्नेस्यायुर्मे देहि॥ वर्चोदा अग्नेसि वर्चो मे देहि॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण॥ मेधां मे देवः सविता आदधातु॥ मेधां मे देवी
सरस्वती आदधातु॥ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ॥ अंगान्यालभ्य जपति॥ अंगानि च आप्यायंतां॥ वाक् च म आप्यायतां॥ प्राणश्च
म आप्यायतां॥ चक्षुश्च म आप्यायतां॥ श्रोत्रं च म आप्यायतां॥ यशोबलं च म आप्यायतां॥ आयुष्करणं करोति॥ भस्मना ललाटे ग्रीवा
यां दक्षिणांसे हृदि च॥ त्र्यायुषमिति प्रतिमंत्रं॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं॥१॥ शतायुष्यं बलायुष्यं॥ काश्यपगोत्रः काश्य राम
११

पगोत्रः काश्यपावत्सारनैध्रुवेति त्रिः प्रवरः॥ रामशर्माहं भो अग्ने अभिवादयामि॥ सूर्यमभिवादयामि॥ आचार्यमभिवादयामि॥ परि
तस्यांतरतः कुशेषु प्रागग्रेषु पुरस्तात् छित्वा॥ अश्मानमुदकुंभान्॥ ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूखो मनोहास्खलो विरुजस्त
नूदूषुरिंद्रियहा तान् विजहामि॥ योरोचनस्तमिह गृह्णामि॥ ते कुंभाद्योगृहीत्वा तेनाभिषिंचति॥ तेन मामभिषिंचामि श्रियै यशसे
ब्रह्मणे ब्रह्मवर्चसायेति॥ ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उ॰ मि॥ रो॰ योरोचनस्तमिह गृह्णामि॥ येन श्रियमकृणुतां येनावमृशतां सु
रां येनाक्ष्यावभ्यषिंचतां यद्वां तदश्विना यशः॥ ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उ॰ मि॥ योरोच॰ मि॥ आपो हि ष्ठेति च प्रत्यृचं॥ आपो हि
ष्ठा मयोभुवस्ता न ऊर्जे दधातन॥ महे रणाय चक्षसे॥१॥ ये अप्स्वंतरग्नयः॰ मि॥ योरो॰ मि॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः उ
शतीरिव मातरः॥२॥ ये अप्स्वंतरग्नयः प्र॰ मि॥ योरो॰ मि॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः॥ ये अप्स्वंतरग्नयः
प्र॰ मि॥ योरोच॰ मि॥ त्रिभिस्तूष्णीं॥ उदुत्तममिति मेखलामुन्मुच्य॥ उदुत्तमं वरुणपाशमस्मदवा॰ स्याम॥१॥ अजिनं दंडं
निधाय॥ वासोन्यत्परिधाय॥ आदित्यमुपतिष्ठते॥ उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थाद्दिवायावभिरस्थाच्छतसनिरसि शतसनिं मा
कुर्वाविदन्मा गमयेच उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थाच्छायंयावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमयेति॥ दधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोऽशा॰ २९

तिलावाप्रास्य॥दधिक्राव्णो॰ ऽरिषत्॥जयालोमनखान्मसंरुह्य॥औदुंवरेणादंतधावनं॥अन्नाद्यायव्यूहध्वं॰ सोमोराजायमागमत्
॥समेमुखंप्रमार्क्ष्यते॥यशसाचभगेनचेति॥ऽस्नाय॥पुनःस्नात्वा॥अनुलेपनान्नासिकेयामुखस्यचोपस्पृशति॥प्राणापानौमेतर्पय
॥चक्षुर्मेतर्पय॥श्रोत्रंमेतर्पयेति॥पितरःशुंधध्वमितिपाणिप्रक्षालनं॥ॐपितरःशुंधध्वं॥ऽदकोपस्पर्शः॥अनुलिप्यजपेत्॥सु
चक्षाअहमक्षीभ्यांभूयासं॰ सुवर्चामुखेन॥सुश्रुत्कर्णाभ्यांभूयासं॥अहतंवासोत्रेणाच्छादेत॥परिधास्येयशोधास्ये॥दीर्घायुत्वायज
रदष्टिरस्मि॥शतंचजीवामिशरदःपुरुचिरायस्पोषमभिसंव्ययिष्ये॥अथोत्तरीयं॥यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती॥यशो
भगश्चमाविंदद्यशोमाप्रतिपद्यतां॥एकंचेत्पूर्वस्योत्तरवर्गेणाप्रच्छादेत॥सुमनसःप्रतिगृह्णाति॥याआहरज्जमदग्निःश्रद्धायैकामे
न्द्रियाय॥ताअहंप्रतिगृह्णामि॥यशसाचभगेनच॥यद्यशोप्सरसामिंद्रश्चकारविपुलंपृथु॥तेनसंग्रथिताःसुमनसआवध्नामियशो
मयि॥ऽष्णीषेणशिरोवेष्टयेत॥युवासुवासाइतिशिरोवेष्टकं॥युवासुवासाःपरिवीतआगात्सऽश्रेयान्भवतिजायमानः॥तंधीरासः
कवयऽन्नयंति॥स्वाध्योमनसादेवयंतः॥अलंकरणमसिभूयोलंकरणंभूयादितिकर्णवेष्टकौ॥अलंकरणमसिभूयोलंकरणंभू
यात्॥वत्रस्येत्यंजनं॥ॐवृत्रस्यासिकनीनकश्चक्षुर्दाअसिचक्षुर्मेदेहि॥आत्मानमादर्शेप्रेक्षेत॥छत्रंप्रतिगृह्णाति॥ राम ११

बृहस्पतेश्छदिरसि॥पाप्मनोमामंतर्द्धेहिति॥तेजसोयशसोमामंतर्द्धेहिति॥प्रतिष्ठेस्थोविश्वतोमापातमिति॥ऽपानहौप्रतिमुंचते॥
विश्वाभ्योमानाष्ट्राभ्यःपरिपाहि॥सर्वतःशति॥वैणवंदंडमादत्ते॥दंतप्रक्षालनादयमपि॥वासश्छत्रोपानहश्चअपूर्वाणिचेत्संभवः॥पूर्वो
क्तेहिनिएवंगुणविशेषणविशिष्टायांपुण्यतिथौकृतस्यसमावर्त्तनाख्यस्यकर्मणःसांगतासिद्ध्यर्थंआचार्यायमनसोद्दिष्टदक्षिणांअ
हंदास्ये॥तेनश्रीकर्मांगदेवताःप्रीयंतां॥ ॥इतिसमावर्त्तनसमाप्तः॥ ॥पूर्वोच्चरितएवंगुणविशेषणविशिष्टायांपुण्यतिथौतत्स्पर
मेश्वरप्रीत्यर्थंवैश्वदेवाख्यंकर्माहंकरिष्ये॥चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥त्रिधावद्धोवृषभोरोरवीतिमहादेवोम
र्त्यांआविवेश॥१॥एषोहदेवःप्रदिशोनुसर्वाःपूर्वोहजातःसऽगर्भेअंतः॥सएवजातःसजनिष्यमाणःमानःप्रत्यङ्जनास्तिष्ठतिस
र्वतोमुखः॥२॥अग्नयेप्रतिपूजनंपर्युक्ष॥अग्नयेनमः॥अत्रगंधंपुष्पंधूपंदीपंचोपचारान्समर्पयामि॥त्वंमुखंसर्वदेवानांसप्तार्चिरमि
तद्युते॥आगच्छभगवन्वह्निःकुंडेस्मिन्संनिधोभव॥अग्नयेनमःनैवेद्यं॥ॐब्रह्मणेनमःस्वाहा॥इदंब्रह्मणेनमम॥प्रजापतयेस्वाहा
॥इदंप्रजापतयेनमम॥गृह्याभ्यःस्वाहा॥इदंगृह्याभ्योनमम॥कश्यपायस्वाहा॥इदंकश्यपायनमम॥अनुमतेस्वाहा॥इदंअनुमतेन
मम॥मणिकेजीन॥पर्जन्यायनमः॥इदंपर्जन्यायनमम॥अद्भ्योनमः॥इदमद्भ्योनमम॥पृथिव्यैनमः॥इदंपृथिव्यैनमम॥प्रतिदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.श्री०
४

शंवायवेदिशांच॥४॥प्राच्यैदिशेनमः॥इदंप्राच्यैदिशे॥दक्षिणायैदिशेनमः॥इदंदक्षिणायैदिशे॥प्रतीच्यैदितनमः॥इदंप्रतीच्यैदिशे॥उ
दीच्यैदिशेनमः॥इदंउदीच्यैदिशे॥मध्येत्रीन्॥ब्रह्मणेनमः॥इदंब्रह्मणे॥अंतरिक्षायनमः॥इदमंतरिक्षाय॥सूर्यायनमः॥इदंसूर्याय॥
विश्वेभ्योदेवेभ्योनमः॥इदंविश्वेभ्योदेवेभ्योनमः॥विश्वेभ्योभूतेभ्योनमः॥इदंविश्वेभ्योभूतेभ्यः॥उषसेनमः॥इदंउषसे॥भूतानांचपत
येनमः॥इदंभूतानांचपतये॥पितृभ्यःस्वधा॥इदंपितृभ्यःस्वधा॥यक्ष्मैतत्तेनिर्णेजनं॥इदंयक्ष्मणोहंततेनमः॥सनकादिमनुष्येभ्यो
नमः॥इदंसनकादिमनुष्येभ्यः॥ऐंद्रवारुणवायव्यायाम्यावैनैर्ऋतिकास्तथा॥वायसाप्रतिगृह्णंतुभूम्यांपिंडंमयार्पितं॥श्वानौश्यामश
वलौवैवस्वतकुलोद्भवौ॥ताभ्यामन्नंप्रदास्यामिवायसाप्रतिगृह्णतां॥१॥वैश्वानवीसुरभीमातानित्यंविष्णुपदेस्थिता॥गोग्रासंमयादत्तं
सुरभिप्रतिगृह्यतां॥३॥ ॥इतिवैश्वदेवःसमाप्तः॥ ॥इतिषोडशकर्मसमाप्तः॥ ॥श्रीगणेशायनमः॥ ॥वेदीस्तुवेदिकाकार्यागृहानिर्गम
दक्षिणे॥विवाहवेद्यर्थकरप्रहेनाविस्तारदीर्घासिकरैर्नतस्याः॥उच्चांगुलाविंशतिरेखयुक्ताविमेखलासानुपनीतकाले॥१॥आचा
र्यस्तुपदैशद्भिःचतुर्भिरथवाष्टकैः॥विस्तृतांचतुरस्त्रांचवधुवेदींकारयेन्नता॥२॥लंबाभित्तिद्विहस्तास्यात्तद्वात्रिंशदंगुलोन्नता॥प
त्यविध्याविवाहेषुविस्तृताद्वादशांगुला॥३॥अथवेदीसमकुर्वीतसोपानमयपार्श्वयोः॥तदग्रेकलशाकांडस्तियत्नविदामतं॥४॥क

गुरु

षोडशा०
२४

न्याहस्तोःपंचभिःसप्तभिर्वाकुर्याद्वेदींकूर्मपृष्ठस्तथोग्रा॥रम्यहर्म्येनिर्गमेद्वामभागेजायापत्योराशिषःस्तंवयष्टिः॥ ॥प्राक्पश्चिमा
ईशद्र्शकयुक्तंउदीच्यपाम्यास्तुपदानिपंच॥एवंगुरोज्योतिशरत्नवेदिकावंदुःशतायुमनेयोवदंति॥१॥ ॥ ॥ ॥शुभमस्तु॥ ॥
॥श्रीगणेशायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इदं पुस्तकं।बाळकृष्णस्य लीखीतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 14:57
,TRANSFERRED=2019/09/16 at 15:04:31
,PAGES=26
,TYPE=STD
,NAME=S0001844
,Book Name=M-670-SHODSHKARM VIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection